कृत याज्ञिक ~~विधि:~~ .

प्रयोग

क्र. नं. ११८

पुण्याह वाचन

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

✓ ३७८०

(1)

॥ श्रीराम ॥ अथ पुण्याहवाचनपुस्तकप्रारंभः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

श्रीगणेशायनमः कृतमंगलस्नानः कृताचमनः प्राङ्मुखोयजमानोवस्त्रा
च्छादितेपिठेउपवेश्यपत्नींस्वदक्षिणतः प्राङ्मुखींमुपवेश्यसंस्कार्यंच
तथैवोपवेश्य ॐ सुमुखश्चेतिश्लोकान्पठित्वा लक्ष्मीनारायणाभ्यांन
मः उमामहेश्वराभ्यांनमः शचीपुरंदराभ्यां नमः मातापितृभ्यो
नमः इष्टदेवताभ्योनमः कुलदेवताभ्यानमः सर्वेभ्योब्राह्मणेभ्यो
नमः आचमन प्राणानायम्यदेशकालौसंकीर्त्यअमुकफलसि
ध्यर्थंश्चोबाद्यकर्मकरिष्ये इतिसंकल्प तदंगतयाआदौपुण्याहवा
चनंमातृकापुजनंनादिश्राद्धंचकरिष्येतिसंकल्प तदंगयाआ
दौगणपतिपुजनंकरिष्येइतिसंकल्प गणानांत्वागृत्समदोग
णपतिर्जगति ॐ गणानांत्वागणपतिंहवामहेकविंकविनामु १

पमश्वथस्तमं ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः
सीदसादनं इत्यृचा मंत्रपुष्पांतं पूजनं कृत्वा गणपतिं संप्रार्थ्य ततः
कर्ता स्वपुरतो दक्षिणतो ॐ महीद्यौः पृथिवी च न इमं यज्ञं मिमिक्ष
तां पिपृतां नो भरीमभिः इति भूमिं स्पृष्ट्वा ॐ ओषधयः संवदंते सो
मेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि इति तयै
व ॐ आकलशेषु धावति पवित्रे परिषिच्यते उक्थैर्यज्ञेषु वर्द्ध
ते इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या आ
सिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया इति तीर्थज
लेन प्रत्येकं पूरयित्वा गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ईश्व
रीं सर्वभूतानां तामिहोपह्वये श्रियं इति गंधान्कलशेषु निक्षिप्य पूर्णा

(3)

दूर्वापरापमसुपुष्पां पुनरापता सर्वे च विकीर्णा वहाइष मर्जे ऊनक्र
ता इति सतं इ लाभ्यां सकालाभ्यो कलशायोरान नेपिद्ध्यात् सर्वत्र
सिकलशं मंत्रावृत्तिः उत्तरसंस्थात् ततः ॐ तत्वायामि ब्रुवेनः शुपो
वरुणस्त्रिष्टुप् ॐ तत्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो ह शु
विर्भिः अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः इ
ति उत्तरकलशे वरुणमावाहयेत् गंधनादिना संपूजयेत् ततः
उत्तरकलशे देवता आवाहयेत् कलशस्येति। सर्वे समुद्राः सरितः
तीर्थानि जलदा नदाः आयांतु मम शांत्यर्थं दुरितक्षयकारकाः इ
ति कलशाभ्यां तान् निर्क्षिपेत् मातृदेवो भव पितृदेवो भव
आचार्यदेवो भव अतिथिदेवो भव ततः अवनिकृतजानुमंड २
लः कमलमुकुलसदृशमंजलिं शिरस्याधायदक्षिणेन पाणि

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

नास्तुवर्णपूर्याकलश्चंधारइत्या आदिषः प्रार्थयंते एताः सत्याश्चाशिषः
संतु दीर्घोनागानद्योगिरयस्त्रीणीविष्णुपदानिच तेनायुः प्र
माणेनपुण्याहंदीर्घमायुरस्तु शिवआपः संतुसोमनस्यमस्तुअ
क्षतंचारिष्टंचास्तु गंधाः पांतु सुमंगल्यंचास्तु अक्षताः पांतुआयु
ष्यमस्तु पुष्पाणिपांतुसौभाग्यमस्तु तांबुलानीपांतुऐश्वर्यमस्
तु दक्षिणाः पांतुबहुधेयंचास्तु यन्न सर्वत्र ब्राह्मणैरक्षितप्र
त्यक्षरंदैयं यत्कृत्वासर्ववेद × दीर्घनायुः शांतिःपुष्टिस्तुष्टिश्चास्तु
श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्तु × यान्न • देवयज्ञ
क्रियाकरणाकर्मारंभाः शुभाः शोभनाः प्रवर्तंते तमहमोंकार मा
दिं कृत्वा ऋग्यजुः सामाशीर्वचनंबहुऋषिमतंसंविज्ञातंभवद्भिर
नुज्ञाताः पुण्यंपुण्याहं वाचयिष्ये वाच्यतांमितिवदेयुः एवमुत्त

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५) अत्रापि यथायोग्यं भत्तफत्तरं देयं नतो यजमानः भद्रं कर्णेभिः शृणुयाम
देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यश
म देवहितं यदायुः द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सन
रस्य प्रयंसत् द्रविणोदा वीरवतीमिषन्नो द्रविणोदा रासते दीर्घमा
युः सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात् सविताधरात्ता
त् सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः २
नवो नवो भवति जायमानो ह्नां केतुरुषसामेत्यग्रे भागं देवेभ्यो
विदधात्यायं प्रचंद्रमास्तिरते दीर्घमायुः ३ उच्चा दिवि दक्षिणावं
तो अस्थुर्ये अश्वदाः सह ते सूर्येण हिरण्यदा अमृतत्वं भजं ३
ते वासोदाः सोम प्रतिरंत आयुः आपः इदं तु जीवसे दीर्घायु

(5A)

त्वाय वर्चसे यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि जा
तवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां यस्मै त्वं
सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं अश्विनं स पुत्रिणं वीरव
न्तं गोमन्तं रयिं नशते स्वस्ति सर्वासिं वामियजुषामायुर्धनं च
व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां ब्राह्मणानां
मनः समाधीयतां समाहितमनसः स्मः प्रसीदंतु भवंतः प्रस
न्नाः स्मः शांतिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नम
स्तु आयुष्यमस्तु आरोग्यमस्तु शिवं कर्मास्तु कर्मसमृद्धिरस्तु
वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु पुत्रसमृद्धिरस्तु धनधा
न्यसमृद्धिरस्तु इष्टसंपदस्तु अरिष्टनिरसनमस्तु यत्पापं त
त्प्रतिहतमस्तु यच्छ्रेयस्तदस्तु उत्तरे कर्मण्यविघ्नमस्तु

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(5) उत्तरोत्तरमहरहरभिवर्द्धिरस्तु उत्तरोत्तराः क्रियाः शुभाः शोभनाः सं
पद्यंतां तिथिकरणमुहूर्तनक्षत्रसंपदस्तु तिथिकरणमुहूर्तन
क्षत्रग्रहलग्नाधिदेवताः प्रीयंतां तिथिकरणमुहूर्तेसग्रहेस
देवताः प्रीयंतां अग्निपुरोगा विश्वेदेवाः प्रीयंतां इंद्रपुरोगा मरु
द्गणाः प्रीयंतां ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां महेश्वरपुरोगा
उमामातरः प्रीयंतां विष्णुपुरोगाः ऋषिगणाः प्रीयंतां अरुं
धतीपुरोगा एकपत्न्यः प्रीयंतां ऋषयः छंदांस्याचार्या वेदादि
वायशश्च प्रीयंतां भगवती पुष्टिकरी प्रीयतां भगवती तुष्टिकरी
प्रीयंतां भगवती ऋद्धिकरी प्रीयतां भगवान् विघ्नविनायकः प्रीयतां ४
भगवान्स्वामी महसेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थान

The Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint property

(5A)

गतः प्रियतां हरिहरहिरण्यगर्भाः प्रियंतां सर्वाग्रामदेवताः प्रियतां
सर्वाः कुलदेवताः प्रियंतां हताब्रह्मद्विषः हताः परिपंथिनः हतास्य
कर्मणो विघ्नकर्तारः शत्रवः पराभवं यांतु शाम्यंतु घोराणि शाम्यं
तु पापानि शाम्यंत्वितयः शुभानि वर्धंतां शिवा आपः संतु शिवा
ऋतवः संतु शिवा अग्नयः संतु शिवा शिवा आहुतयः संतु शि
वा ओषधयः संतु शिवा वनस्पतयः संतु शिवा अतिथयः संतु
अहोरात्रे शिवे स्यातां निकामे निकामे नः पर्जन्यो वर्षतु फलव
त्यो न ओषधयः पच्यंतां योगक्षेमो नः कल्पतु शुक्रांगारकबुधबृह
स्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे
ग्रहाः प्रियंतां भगवान्नारायणः प्रीयतां भगवान्पर्जन्यः प्रि
यतां भगवान्स्वामी महासेनः पुण्याहवाच्यमीप्येवाच्यतां

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6) ॐ उद्गातेव शकुने सामगायसी ब्रह्मपुत्र इव सवनेषु शंससि वृषेव वा
जी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्वतो नः श
कुने पुण्यमावद। याज्यया यजति प्रत्तिर्वै याज्या पुण्यैव लक्ष्मीः
पुण्यामेव तं लक्ष्मीं संभावयति पुण्यां लक्ष्मीं संस्कुरुते यत्पुण्यं
नक्षत्रं तद्बट् कुर्वीतोपव्युषं यदा वै सूर्य उदेति अथ नक्षत्रं
नैति यावति तत्र सूर्यो गच्छेत् यत्र जघन्यं पश्येत् तावति कुर्वी
त यत्कारी स्यात् पुण्याह एव कुरुते ॐ तानि वा एतानि यमनक्ष
त्राणि यान्येव देवनक्षत्राणि तेषु कुर्वीत यत्कारी स्यात् पुण्या
ह एव कुरुते मध्यंसहकुड्क्षिणे महाजनानां नमस्कुर्वाणाय आ ८
शीर्वचनमपेक्षमाणायास्य कर्मणः पुण्याहं भवन्तो ब्रुवं

(6A)

नु इतिनिर्वदेत ॐ स्वस्तयेवायुमुपब्रवामहेसोमंस्वस्तिभुवनस्यरय स्पतिः बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः आदित्यउदयनीयः पथ्येवतःस्वास्माःअयंतिपथ्यांस्वस्तिमभ्युधं तिस्वस्त्येवतःप्रयंतिस्वस्त्यस्यपारमश्नुतेइति स्वस्तिनइंद्रोवृद्धश्र वाःस्वस्तिनःपूषाविश्ववेदाःस्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्ति नोबृहस्पतिर्दधातु अष्टौदेवावसवःसोम्यासश्चतस्रोदेवीरजरा श्रविष्ठाःतेयज्ञंपांतुरजसःपुरस्तात्संवत्सरीणममृतंस्वस्ति मध्य मित्यादिकमर्थाइत्यंतेपूर्ववत् स्वस्तिनोभवंतोब्रुवंत्विति त्रिः ॐ आयु ष्मतेस्वस्तिइतिप्रतिवचनंत्रिः अध्यामस्तोमंसनुयामवाजमानोमं त्रंसरथेहोपयातंयशोनपक्वंमधुगोष्वंतरामृतांशोअश्विनो कामप्राःसर्वमिद्धिमश्नुयामीतितवेतजसेवपुरस्तात पर्य

(७) भवछंदोभिर्मध्यतोक्षरैस्पुरिष्टा । द्रायन्मासर्वतोद्दादरुणहं परिभूयस
र्वोस्मिन्हृद्द्रभ्भोति यएवंवेद । अथ्यस्मह्व्यैर्नमसोपसद्याभित्रंदे
मित्र ६ वंधेयन्नोअस्तु अनुराधान्हविषावर्धयंतः शतंजीवेम शरदः सु
वीराः त्रीणित्रीणिवैदेवानामृद्धानित्रीणिछंदांसित्रीणिसवनानि
त्रयइमेलोकाः ॥ ७ ॥ अथ्यामेयतद्दीयंपुलोकेषुभातितिष्ठति मद्यम्भिला
दिअस्यकर्मण्यध्वर्धिभवति इतित्रिः ७ ॥ अथ्यभातिवचनांत्रिः
श्रियेजातःश्रियआनिरियायश्रियंवयोजरितृभ्योदधाति श्रीयंवसा
नाअमृतत्वायन्भवंतिसत्यासमिथामितद्रोः श्रियएवैनंतद्ध्रियामाद
धातिसंततमृचावषट्कृत्यंसंततैसंधीयतेप्रजयापशुभिर्यएवंवेद ।
यस्मिन्ब्रह्माभ्यजयत्सर्वमेतदमुंचलोकमिदमुंचसर्वं । तन्नोनक्षत्र ६
मभिजिद्विजित्य । श्रियंदधात्वहृणीयमानं । अहिर्बुध्नियमंत्रमेगोपा

(7A)

य यमरुषय: स्रेविदाविदु: भुवमानियज्ञ ऋषि साहिश्रीरमृतासतां
एतैर्मंत्रैर्नीराजनकार्ये मधुमित्यादि पूर्ववत् अमुककर्मणः श्री
रस्त्विति भवंतो ब्रुवंतु इति त्रिर्ब्रूयात् ॐ अस्तु श्रीरिति विप्राः वर्ष
शतं संपूर्णमस्तु गोत्राभिवृद्धिरस्तु प्रजापतिः प्रियतां मुक्तेभि
रेगो रज्ज आततं त्वां नक्तुं पुनानः कविभिः पवित्रैः शोचिर्वसानः
पर्य्यासुरपांघ्रियोभिमाति स्तृहतीरनूनाः तदप्येषः श्लोकोभी
२ गीतो मरुतः परिवेष्टारो मरुतस्यावसन्गृहे आवीक्षितस्य कामप्रेर्विश्वेदे
वाः सभासद इति ततः उत्तरकल्पोदाहृतं पाहु सदाति पाकल्पं वामह
स्तेगृहीत्वा ताभ्यां धारा हृदयं संततं पात्रे निषिंचेद्भिमेर्मंत्रैः वास्तोष्पते
प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः यत्वेमहे प्रति तन्नो जु
षस्व शं नो भव द्विपदे शं चतुष्पदे वास्तोष्पते प्रतरणो न एधि गयस्फा

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(४)

नोगोभिरिंद्रो प्यजरासस्तेसख्येस्याममपिलेवपुत्रान्प्रतिनोजुषस्व
वास्तोष्पतेशग्मया संसदातेसक्षीमहि रण्वयागातुमत्या पाहिक्षे
मउतयोगे वरंन्नोयूयंपात स्वस्तिभिः सदानः अमीवहावास्तोष्पते
विश्वारूपाण्याविशन् सखासुसेवएधिनः शिवंशिवं ननःकृत्तुः
पत्नीवामतः उपवेश्यपात्रपातितजलेन पल्लवदूर्वादिभिरुदङ्मु
खाविप्राअभिषिंचेयुःति ततः तत्रमंत्राः समुद्रज्येष्ठाः सलिल
स्यमध्यात्पुनानायंत्यनिविशमानाः इंद्रायावज्रीवृषभोरराद ता
आपोदेवीरिहमामवंतु याआपोदिव्याउतवास्रवंतिखनित्रिमाउ
तवायाःस्वयंजाः समुद्रार्थायाः शुचयःपावकास्ताआपोदेवीरिहमा
मवंतु यासाराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनाः
नां मधुश्च्युतःशुचयोयाःपावकास्ताआपोदेवीरिहमामवंतु

(8A)

यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्जंमदंति वैश्वानरोयाः
स्वग्निः प्रविष्टस्ताआपोदेवीरिहमामवंतु आयंत्वामभिहदेवास्त्र्या
यतांमरुतांगणः आयंतोविश्वानितानियथायामरपाभ्येसन् आ
पउद्दद्दउभेषजीरापोअमीवचातनि आपःसर्वस्यभेषजीस्ता
ष स्तास्कृण्वंतुभेषजं हस्ताभ्यांदशशाखाभ्यांजिह्वावाचःपुरोगवीअ
नामयित्नुभ्यांत्वातलाभ्यांत्वोपस्पृशामसि इमाआपःशिवतमा
इमाःसर्वस्यभेषजीः इमाराष्ट्रस्यवर्धनीरीमाराष्ट्रभृतोमला
याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमराजानंवरुणंयमंमनुं ताभिर
द्भिरभिषिंचामित्वामहंराज्ञांत्वमधिराजोभवेह। महांतंत्वामही
नांसम्राजंचर्षणीनां देवीजनित्र्यजीजनतभद्राजनित्र्यजीजनत्
देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांअग्नेस्तेजसा

(१) सूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिंचामि बलायश्रियेयशसेन्नाद्या
याऽ ॐभूर्भुवस्वः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com